## परिक्लिश्यमाने च । (५५/३३७७)

[1]स्वाङ्गे, द्वितीयायाम् इत्येव । परिक्लिश्यमाने स्वाङ्गवाचिनि द्वितीयान्ते उपपदे धातोः णमुल् [2]प्रत्ययो भवति । परिक्लेशः सर्वतो[3] विबाधनम्, [4]दुःखनम् । उरःपेषं युध्यन्ते, [5]उरःप्रतिपेषं युध्यन्ते[6] । [7]शिरःपेषम्, शिरःप्रतिपेषम् । कृत्स्नमुरः पीडयन्तो युध्यन्ते । [8]ध्रुवार्थोऽयमारम्भः ॥

## विशिपतिपदिस्कन्दां व्याप्यमानासेव्यमानयोः । (५६/३३७८)

[9]द्वितीयायाम् इत्येव । द्वितीयान्ते उपपदे विश्यादिभ्यो धातुभ्यो णमुल् [10]प्रत्ययो भवति, व्याप्यमाने आसेव्यमाने चार्थे गम्यमाने । [11]विश्यादिभिः क्रियाभिरनवयवेन पदार्थानां सम्बन्धो व्याप्तिः । तात्पर्यम् आसेवा । द्रव्ये व्याप्तिः, क्रियायामासेवा । गेहानुप्रवेशमास्ते । समासेन व्याप्त्यासेवयोरुक्तत्वात् 'नित्यवीप्सयोः' (८.१.४/२१४०) इति द्विर्वचनं न भवति । [12]असमासपक्षे तु व्याप्यमानतायां [13]द्रव्यवचनस्य द्विर्वचनम्, आसेव्यमानतायां तु क्रियावचनस्य । तथा च वक्ष्यति – 'सुप्सु वीप्सा, तिङक्षु नित्यता' इति । [14]गेहं गेहमनुप्रवेशमास्ते । आसेवायाम् – गेहमनुप्रवेशमनुप्रवेशमास्ते । पति – गेहानुप्रपातमास्ते, गेहं गेहमनुप्रपातमास्ते, गेहमनुप्रपातमनुप्रपातमास्ते । पदि – गेहानुप्रपादमास्ते, गेहं गेहमनुप्रपादम्,[15] गेहमनुप्रपादमनुप्रपादम्[16] । स्कन्दि – गेहावस्कन्दमास्ते, गेहं गेहमवस्कन्दम्,[17] गेहमवस्कन्दमवस्कन्दम्[18] । व्याप्यमानासेव्यमानयोः इति किम् ? गेहमनुप्रविश्य भुङ्क्ते । ननु आभीक्ष्ण्ये णमुल् विहित [19]एव, आसेवा आभीक्ष्ण्यमेव, [20]किमर्थं [21]पुनरासेवायां णमुल् उच्यते ? क्त्वानिवृत्त्यर्थम् इति चेत्, न, [22]इष्टत्वात् तस्य । द्वितीयोपपदार्थं [23]तर्हि वचनम्, उपपदसमासः पक्षे यथा स्यात् । तेन हि सति [24]उपपदाभावः ॥

## अस्यतितृषोः क्रियान्तरे कालेषु । (५७/३३७९)

[25]द्वितीयायाम् इत्येव । क्रियामन्तरयति क्रियान्तरः, क्रियाव्यवधायकः । क्रियान्तरे धात्वर्थे वर्तमानाभ्याम्[26]अस्यतितृषिभ्यां द्वितीयान्तेषु कालवाचिषु उपपदेषु णमुल् प्रत्ययो भवति ।[27] द्व्यहात्यासं गाः पाययति,[28] [29]द्व्यहमत्यासं गाः पाययति । [30]त्र्यहात्यासं गाः पाययति, त्र्यहमत्यासं गाः पाययति । द्व्यहतर्षं गाः पाययति, द्व्यहंतर्षं गाः पाययति । अत्यसनेन तर्षणेन च गवां पानक्रिया [32]व्यवधीयते [33]विच्छिद्यते । अद्य पाययित्वा द्व्यहमतिक्रम्य पुनः पाययति इत्यर्थः । अस्यतितृषोः इति किम् ? द्व्यहमुपोष्य भुङ्क्ते । क्रियान्तरे इति

---

1. वाक्यमिदं नास्ति ब. फ. 2. प्रत्ययो नास्ति फ. 3. अपि इत्यधिकम् फ. ह. 4. दुःखम् फ, क्लेशः सर्वतोऽपि बाधनः दुःखम् ह. 5. उरःप्रतिपीडम् फ, नास्ति ब. 6. कृत्स्नमुरः पीडयन्तो युध्यन्ते इत्यर्थः इत्यधिकम् ब. फ. 7. शिरःपेषम् नास्ति ब. ह. 8. पूर्वेणैव सिद्धे इत्यधिकम् क, वाक्यमिदं नास्ति ह. 9. वाक्यमिदं नास्ति फ. 10. प्रत्ययो नास्ति फ. 11. विश्यादिभिः नास्ति फ. 12. असमासे तु ब. 13. द्रव्यस्य ब. 14. विशि – गेहानुप्रवेशमास्ते फ. 15.–18. आस्ते इत्यधिकम् फ. 19. एव नास्ति अ. फ. 20. तत्र इत्यधिकम् फ. 21. पुनर् नास्ति फ. 22. ततो दृष्टत्वात् फ. 23. हि इदं फ. 24. उपपदभावः ह. 25. वाक्यमिदं नास्ति फ. 26. अस्यतितृषोः धात्वोः फ, वर्तमानात् अस्यतेः तृष्यतेश्च धातोः ब. ह. 27. अस्यति–इत्यधिकम् ब. ह. 28. पयः इत्यधिकम् फ. 29. द्व्यहमत्यासं नास्ति ब. 30. वाक्यमिदं नास्ति फ, त्र्यहमत्यासं नास्ति ह. 31. तृषिभ्यः इत्यधिकम ह, उदाहरणमिदं नास्ति ब. 32. व्यवसीयते ह. 33. व्यवच्छिद्यते इत्यधिकम् फ. ह.